ज्ञानादृलाघवसहकृतादेकस्यैव सर्वज्ञस्य सिद्धेः ॥ अथे श्वरज्ञानमूलकशब्दशक्तिग्रहे प्रयोज्यव्यापारानुमितघटज्ञाने घटशब्दस्य कारणताग्रहोभ्रमः स्यात् तदीयज्ञानस्य नित्यत्वात् तथा च तज्जन्यघटशब्दशक्तिग्रहस्य भ्रमत्वे सकलशब्दज्ञानं भ्रमःस्यात् भ्रमपरम्परामूलकत्वात् अनित्यसर्वज्ञमूलकशब्दत्वग्रहे च नायं दोष इति चेन्न व्यापारानुमितमिदं घटज्ञानं घटपदजन्यमिति ज्ञानस्य शब्दशक्तिग्रहकारणस्य भ्रमत्वेऽपि घटपदं घटशक्तमिति ज्ञानस्य यथार्थत्वात् विषयाबाधात् न च भ्रममूलकत्वेन तस्य भ्रमत्वमनुमेयं तदंशे व्याधिकरणप्रकाराभावेनाबाधात् बाधितविषयत्वस्योपाधित्वाच्च। अत्र घटमानयेति शब्दानन्तरं सूत्रसञ्चाराधिष्ठितदारुपुत्रस्य घटानयनव्यवहारदर्शनाद्बालो घटपदे व्युत्पद्यते तन्मूलकशाब्दज्ञानमपि न भ्रमः तस्यापि भ्रमत्वे प्रयोज्य व्यवहारादिदानीं व्युत्पत्तिर्न स्यात् किमयं प्रयोज्यश्चेतन व्यवहाराद्व्युत पन्नोऽचेतनव्यवहाराद्वेति संशयस्य वज्रलेपायमानत्वात् ॥ "विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतः पात्। सं बाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एक एवेत्यादि श्रुतयः"। "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः" इत्यादयः स्मृतयश्च वह्व्योमानत्वेनानुसन्धेया इति"।

खण्डनकृता तु ईश्वरविषये प्रश्नाद्यनुपपत्त्युपन्यासेन व्यतिरेकमुखेन ईश्वरस्य प्रामाणिकत्वमुररीकृतं यथा"तथाहीश्वरसद्भावे किं प्रमाणमिति ब्रुवाणः प्रतिवक्तव्यः किंशब्दोऽयमाक्षेपार्थो वा१कुत्सितार्थो वा२वितर्कार्थो वा३प्रश्नार्थो वा४स्यात्। तत्र यदि प्रथमः पक्षः तदेश्वरसद्भावे नास्ति प्रमाणमित्युक्तं स्यात् तथा च सति न प्रतिज्ञामात्रात्साध्यसिद्धिरिति हेत्वादिकं वाच्यं भवति। तच्च भवता नाभ्यधायि तस्मान्न्यूनत्वं दोषः। अतएव न द्वितीयः, ईश्वरसद्भावे कुत्सितं प्रमाणमित्यस्यापि प्रतिज्ञामात्रत्वात्। अपि च साध्यासाधकत्वाद्वा १तत् कुत्स्यते भवता अन्यथा २वा। अन्यथा चेदलं तदुद्भावनया साध्यसिद्धेरप्रत्यूहत्वात्। नापि प्रथमः प्रमाणञ्च साध्यासाधकञ्चेति व्याघातात्। गौणोऽयं प्रमाणशब्द इति चेन्न प्रमाणत्वयोगिनि यद्ययं प्रमाणशब्दप्रयोगः तदा गौणताव्याघातः मुख्यत्वात्। अथ प्रमाणाभासे तदा, अलन्तदुद्भावनया ईश्वरसद्भावे यः प्रमाणाभासः स कुत्सितइत्यत्र परस्यापि सम्प्रतिपन्नत्वात्, ईश्वरसद्भाव इति च विशेषोपादानं व्यर्थं स्यात् अन्यत्रापि हि विषये प्रमाणाभासः कुत्सितएव साध्यासाधकत्वात्। नापि तृतीयः तथा सति हि वितर्कस्य पक्षान्तरसापेक्षत्वेन पक्षान्तरमपि वचनीयं भवति ईश्वरसद्भावे किमेतत् प्रमाणमुतान्यदिति तच्च ? भवता नाभ्यधायि अतो न्यूनत्वं दोषः। नापि चतुर्थः प्रश्नार्थात् खलु किंशब्दात्कस्यचित् पदार्थस्य जिज्ञास्यमानता प्रतीयते सा चेह प्रमाणपदसमभिव्याहारात् प्रमाणविषयिणी प्रतीयते यद्विषयश्च प्रश्नस्तदुत्तरवादिनाभिधेयं तत्। अयं प्रश्न ईश्वरसद्भावे प्रमाणसामान्यविषयस्तद्विशेषविषयो वाभिप्रेत आद्यश्चेदीश्वरद्भावे प्रमाणमित्येवोत्तरमापद्येत यद्विषयो हि प्रश्नस्तदभिधेयं, प्रमाणसामान्यविषयश्च प्रश्नः तच्च प्रमाणशब्देनाभिधीयतएव। अथ द्वितीयः तथापीश्वरसद्भावे प्रमाणमित्येवोत्तरमापद्येत यथा प्रश्नवाक्ये प्रमाणशब्दविशेषपरस्तथोत्तरवाक्येऽपि। कोऽसौ विशेषइति चेन्न पूर्व्ववदुक्तोत्तरत्वात्। किञ्च अस्यापि प्रश्नस्य विशेषोविषयः किंशब्दस्य विशेषशब्देन सामानाधिकरण्यात् तथाच सति विशेषएवोत्तरं स्यात्। स्यादेतत् विशेषशब्देन न विशेषमात्रमनिर्द्धारितमत्र विवक्षितं किन्त्वसाधारणी व्यक्तिस्तत्र विशेषशब्दस्य तात्पर्य्यं तस्मात्कासावसाधारणी प्रमाणव्यक्तिरिति प्रश्नार्थः तत्र च तादृश्याः प्रमाणव्यक्तेरभिधानमुत्तरं युक्तं नैवंविधाः प्रलापाइति नैतदेवं यतोऽत्रापि विशेषइत्येवोत्तरम् यथा प्रश्नवाक्यगतस्य विशेषशब्दस्य सर्व्वतोव्यावृत्तस्वरूपायां प्रमाणव्यक्तौ तात्पर्य्यं तथोत्तरवाक्यस्थितस्यापि। एवञ्च सति यत्र विषये भवदीयस्य प्रश्नवाक्यस्य तात्पर्य्यं तदेवास्माकमुत्तरवाक्येन प्रतिपादितमिति युक्तमुक्तम्। अथ मन्यसे किमिह प्रमाणमिति पृच्छतोऽयमभिप्रायः अत्रार्थेऽनुमानं प्रमाणमितरद्वेति। अत्राप्यनुमानमित्युत्तरमस्माकम्। किं तदनुमानमिति चेत्। अयमपि प्रश्नोऽनुमानमात्रविषयः उत तद्विशेषविषय इति विकल्प्य प्रमाणप्रश्नवदुत्तरं वाच्यमिति। अत्र च संग्रहश्लोकौ। "यथाविधं यं विषयं नियस्य प्रश्नस्य निर्व्वक्ति परो यथोक्त्या। वाच्यस्तथैवोत्तरवादिनापि तथैव वाचा स तथाविधोऽर्थः। प्रश्नस्य यः स्याद्विषयः स वाच्यो वाचा तया चैष भवेन्निरुक्तः। इदं त्वयाप्यास्थितमेतयैव गिरा स्वपृच्छाविषयस्य वक्त्रा।" प्रश्नार्थाच्च किंशब्दाज्जिज्ञासाविषयतार्थस्य प्रतीयते जिज्ञासा च ज्ञातुमिच्छा इच्छा च नाज्ञाते भवत्यतिप्रसङ्गात् तस्मादीश्वरविषयं प्रमाणं ज्ञातुमिच्छता तत्र स्वज्ञानमिच्छाकारणीभूतं वक्तव्यं तदयथार्थं